

# दशमी कक्ष्या

## प्रथमः पाठः।

# आयुरारोग्यसौख्यम्।

**श्लोकः - 1**

परिश्रमो मिताहरो
भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहम्
वैद्यमन्यं समाश्रये।।

## पदपरिचयः।

**पर्यायपदानि।**

परिश्रमः-व्यायामः, प्रयत्नः।

आहारः -भोजनम्, भक्षणम्।

वैद्यः -चिकित्सकः, भिषक्।

**विलोमपदानि।**

परिश्रमः X विश्रमः।

मितः X अमितः।

अनादृत्य X आदृत्य।

**गद्यक्रमः।**

अत्र क्रियापदं किम्? - (न एव)समाश्रये।

कं न एव समाश्रये? -वैद्यं न एव समाश्रये।

कीदृशं वैद्यं न एव समाश्रये? -अन्यं वैद्यं न एव समाश्रये।

किं कृत्वा अन्यं वैद्यं न एव समाश्रये? -अनादृत्य अन्यं वैद्यं न एव समाश्रये।

कौ अनादृत्य अन्यं वैद्यं न एव समाश्रये? -तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये।

कीदृशौ तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये? -अश्विनीकुमारौ तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये।

कीदृशौ तौ अश्विनीकुमारौ अनादृत्य अन्यं वैद्यं न एव समाश्रये? -
भूगतौ अश्विनीकुमारौ तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये।

पुनः कीदृशौ भूगतौ अश्विनीकुमारौ तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये? -

**परिश्रममिताहाररूपौ भूगतौ अश्विनीकुमारौ तौ अनादृत्य अन्यं वैद्यं न एव समाश्रये।**

## श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

1. भूगतौ अश्विनीसुतौ कौ?
2. सुभाषितात् क्रियापदम् चित्वा लिखत ।
3. सुभाषिते विद्यमानं ल्यबन्तम् अव्ययपदं लिखत ।
4. अधोरेखाङ्कितपदस्य पदच्छेदं लिखत ।
5. एतत्  सुभाषितं कस्मात् ग्रन्थात् स्वीकृतं भवति?
6. समाश्रये अत्र लकारः कः?
7. श्लोके व्यायामः इत्यर्थे प्रयुक्तं पदं किम्?
8. अत्र वैद्यम् इति पदस्य विशेषणं किम्?

## उत्तराणि

1. परिश्रममिताहरौ
2. समाश्रये
3. तावनादृत्य
4. भूगतौ+अश्विनीसुतौ
5. सुभाषितावलिः
6. लट्
7. परिश्रमः
8. अन्यम्

## गद्यक्रमं लिखत ।

परिश्रमः....................भूगतौ................ ।तौ अनादृत्य...........अहं............... ।

## अधिकविस्तरः

# वर्गाक्षराणि

| 1 | 2 | 3 | 4 | 5 |
|---|---|---|---|---|
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |

अ + ः + (3,4,5 वर्गाक्षराणि), य,र,ल,व,श,ष,स,ह > उ

अ + उ = ओ

परिश्रमः + मिताहारः = परिश्रमो मिताहारः

शुनकः + भषति = शुनको भषति

सिंहः + गर्जति= सिंहो गर्जति

बिडालः + धावति = बिडालो धावति

औ + स्वरः = आव्

भूगतौ + अश्विनीसुतौ = भूगतावश्विनीसुतौ

तौ + अनादृत्य = तावनादृत्य

पाठम् + अपठत् = पाठमपठत्

समाश्रये > सम् + आङ् + श्रिञ् आत्म. लट्. उ. पु. ए. व.।

(आत्मनेपदि लट् उत्तमपुरुषैकवचनम्)

अनादृत्य = न आदृत्य (ल्यबन्तमव्ययम्)

(उदा :- सम्भाव्य, विलिख्य,आगत्य, उपगम्य, परिश्रम्य, विचिन्त्य)

उपसर्गपूर्वकरूपेणैव ल्यबन्तमव्ययं प्रयुज्यते।

**श्लोकः - 2**

शनैरर्थ: शनै: पन्था:
शनै:  पर्वतमारुहेत् ।
शनैर्विद्या च धर्मश्च
व्यायामश्च शनै: शनै: ॥

**पदपरिचयः।**

**समानपदम्।**

विद्या -ज्ञानम्।

**पर्यायपदानि।**

शनैः -मन्दम्,अद्रुतम्।

अर्थः -वित्तम्, धनम्।

पन्थाः -मार्गः, वीथिः।

पर्वतः -अचलः, गिरिः।

**विलोमपदानि।**

शनैः X द्रुतम्।

विद्या X अविद्या(अज्ञानम्)।

धर्मः X अधर्मः।

**गद्यक्रमः।**

अत्र करणीयः इति स्वीक्रियते।

किं किं करणीयम्? - अर्थः, पन्थाः च करणीयः।

अर्थः, पन्थाः च कथं करणीयः?- अर्थः शनैः, पन्थाः शनैः च करणीयः।

किम् आरुहेत्? -पर्वतम् आरुहेत्।

पर्वतं कथम् आरुहेत्? -पर्वतम् शनैः आरुहेत्।

पुनः किं किं करणीयः? - धर्मः व्यायामः च करणीयः।

धर्मः व्यायामः च कथं करणीयः? -धर्मः व्यायामः च शनैः करणीयः।

**एवं**

**अर्थः शनैः, पन्थाः शनैः च करणीयः। पर्वतम् शनैः आरुहेत्। धर्मः व्यायामः च शनैः करणीयः।**

## श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

1.अर्थः कथं सम्पादनीयः?

2.मार्गः इत्यर्थकं पदं किम्?

3.श्लोके वित्तम् इत्यर्थे वर्तमानकं पदं किम्?

4. शनैरर्थ: इति पदस्य पदच्छेदः कः?

5.एतत् सुभाषितं कस्मात् ग्रन्थात् स्वीकृतं भवति?

6. सुभाषितात् क्रियापदं चित्वा लिखत ।

## उत्तराणि

1.शनै:

2.पन्था:

3.अर्थः

4. शनै:+अर्थः

5.चाणक्यनीतिः

6.आरुहेत्

## गद्यक्रमं लिखत ।

............शनैः

पन्था..................शनैः..................आरुहेत्

............शनैः धर्मः...................च.................च ।

# अधिकविस्तरः।

ः+ स्वरः = र्

शनैः + अर्थः = शनैरर्थः

प्राप्तिः + अस्ति = प्राप्तिरस्ति

सृष्टिः + एषा = सृष्टिरेषा

ः + चवर्गः = श्

रामः + च = रामश्च

अर्थः + च = अर्थश्च

धर्मः + च = धर्मश्च

गजः + च = गजश्च

व्यायामः + च = व्यायामश्च

ः + व्यञ्जनम् = र् (चिह्नम्)

शनैः + विद्या = शनैर्विद्या

गतिः + नास्ति = गतिर्नास्ति

विधिः + भवति = विधिर्भवति

## **अव्ययम्**

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

व्ययम् = മാറ്റം

शनैः शनैः > अव्ययम्

(उदा:- पुनः पुनः, मुहुर्मुहुः, पृथक् पृथक्)

**श्लोकः 3**

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति ॥

**पदपरिचयः।**

**पर्यायपदानि।**

ईर्ष्या -अक्षान्तिः, असूया।

भयः -भीतिः, त्रासः।

क्रोधः -रोषः,अमर्षः।

लुब्धः -लोलुपः, लम्पटः।

रुक् -रोगः, व्याधिः।

विद्वेषः -शत्रुता, वैरम्।

अन्नम् - ओदनम्, भुक्तम्।

सम्यक् -समीचीनम्,उत्तमम्।

परिपाकम् -पक्वम्, परिणतम्।

**विलोमपदानि।**

भयः X निर्भयः।

क्रोधः X शान्तः।

**गद्यक्रमः।**

अत्र क्रियापदं किम्? -(न)एति।

किं न एति ? -परिपाकं न एति।

कथं परिपाकं न एति? -सम्यक् परिपाकं न एति।

किं सम्यक् परिपाकं न एति? -अन्नं सम्यक् परिपाकं न एति।

कीदृशम् अन्नं सम्यक् परिपाकं न एति? -सेव्यमानम् अन्नं सम्यक् परिपाकं न एति।

केन सेव्यमानम् अन्नं सम्यक् परिपाकं न एति? -

विद्वेषयुक्तेन सेव्यमानम् अन्नं सम्यक् परिपाकं न एति।

पुनः कीदृशेन सेव्यमानम् अन्नं सम्यक् परिपाकं न एति? - रुग्दैन्यनिपीडितेन विद्वेषयुक्तेन चसेव्यमानम् अन्नं सम्यक् परिपाकं न एति।

पुनः कीदृशेन सेव्यमानम् अन्नं सम्यक् परिपाकं न एति? - लुब्धेन रुग्दैन्यनिपीडितेन विद्वेषयुक्तेन  च सेव्यमानम् अन्नं सम्यक् परिपाकं न एति।

पुनः कीदृशेन सेव्यमानम् अन्नं सम्यक् परिपाकं न एति? - **ईर्ष्याभयक्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन विद्वेषयुक्तेन च सेव्यमानम् अन्नं सम्यक् परिपाकं न एति।**

## यथोचितं योजयत

| | |
|---|---|
| ईर्ष्या | भीतिः |
| भयम् | असूया |
| क्रोधः | लोलुपः |
| लुब्धः | अमर्षः |
| अन्नम् | भुज्यमानम् |
| सेव्यमानम् | आहारः |

## उत्तराणि

| | |
|---|---|
| ईर्ष्या | असूया |
| भयम् | भीतिः |
| क्रोधः | अमर्षः |
| लुब्धः | लोलुपः |
| अन्नम् | आहारः |
| सेव्यमानम् | भुज्यमानम् |

## श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

1.एतत् सुभाषितं कस्मात् ग्रन्थात् स्वीकृतम्?

2.एति इति पदस्य लकारः कः?

3. लोलुपः इत्यर्थे प्रयुक्तं पदं किम्?

4. लुब्धेन सेव्यमानम्.............न परिपाकं एति?

5. ईर्ष्याभयक्रोधेन    सेव्यमानं किं न परिपाकमेति?

## उत्तराणि

1.चरकसंहिता

2.लट्

3. लुब्धः

4. अन्नम्

5. अन्नम्

## गद्यक्रमं लिखत ।

ईर्ष्याभयक्रोधसमन्वितेन............रुग्दैन्यनिपीडितेन..........च.

..........अन्नं...........परिपाकमेति ।

## अधिकविस्तरः

### सन्धिः

परिपाकम् + एति = परिपाकमेति

सुखम् + एव = सुखमेव

पाठम् + एव = पाठमेव

एति - " इण् गतौ " धातु लट् परस्मैपदि प्रथमपुरुष - एकवचनम्।

### इण् धातुः लट् परस्मैपदि

| | | |
|---|---|---|
| एति | इतः | यान्ति |
| एषि | एथः | इथ |
| एमि | एवः | इमः |

**श्लोकः - 4**

आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्म्च्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

**<u>पदपरिचयः।</u>**

**<u>समानपदम्।</u>**

आत्मा -देही।

श्रेयस्करम् - उत्तमम् (उचितम्)।

**<u>पर्यायपदानि।</u>**

कर्ता -कारकः, प्रवर्तकः।

सुखम् - आमोदः, हर्षः।

दुःखम् -व्यथा, पीडा।

**विलोमपदानि।**

सुखम्  X दुःखम् ।

**गद्यक्रमः।**

अत्र क्रियापदं किम्? -अत्र त्रीणि क्रियापदानि सन्ति। १. मन्येत, प्रतिपद्येत, (न)त्रसेत्।

१,किं मन्येत? -आत्मानम् एव मन्येत।

आत्मानम् एव किं मन्येत? -आत्मानम् एव कारणं मन्येत।

आत्मानम् एव कयोः कारणं मन्येत? -आत्मानम् एव सुखदुःखयोः कारणं मन्येत।

२,किं  प्रतिपद्येत? -मार्गं  प्रतिपद्येत।

कीदृशं मार्गं  प्रतिपद्येत? - श्रेयस्करं मार्गं  प्रतिपद्येत।

कस्मात् कारणात्  श्रेयस्करं मार्गं  प्रतिपद्येत?-आत्मानम् एव सुखदुःखयोः कारणं मन्येत। तस्मात् श्रेयस्करं मार्गं  प्रतिपद्येत।

अतः किं न कुर्यात् ? -

**आत्मानम् एव सुखदुःखयोः कारणं मन्येत। तस्मात् श्रेयस्करं मार्गं प्रतिपद्येत, न त्रसेत्।**

श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।

1.कर्तारम् इत्यत्र का विभक्तिः?

2.सुखदुःखयोः कर्ता कः?

3.त्रसेत् इत्यत्र लकारः कः?

4.एतत् सुभाषितं कस्मात् ग्रन्थात् स्वीकृतं भवति?

5.सुभाषितात् क्रियापदं चित्वा लिखत ।

6. अधोरेखाङ्कितपदस्य पदच्छेदं लिखत ।

## उत्तराणि

**1.द्वितीया**

**2.आत्मा**

**3.विधिलिङ्**

**4.चरकसंहिता**

**5.(न) त्रसेत् , मन्येत, प्रतिपद्येत**

**6.तस्मात्+श्रेयस्करम्**

## गद्यक्रमं लिखत ।

............कर्तारम्..........एव मन्येत । तस्मात्
**श्रेयस्करं........... प्रतिपद्येत न..............।**

## अधिकविस्तरः

विग्रहः

सुखं च दुखं च तयोः > सुखदुखयोः

फलं च मूलं च तयोः > फलमूलयोः

जननं च मरणं च तयोः > जननमरणयोः

सन्धिः

आत्मानम् + एव = आत्मानमेव

(1,2,3,4 वर्गाक्षराणि) + **श्** +स्वरः ह य व र = **छ्**

तस्मात् + श्रेयस्करम् = तस्माच्छ्रेयस्करम्

मत् + शिरः = मच्छिरः

तत् + शिवः = तच्छिवः

विद्युत् + शक्तिः = विद्युच्छक्ति

प्रतिपद्येत – प्रति + पत्लृ धातु विधिलिङ्ग् आत्मनेपदि प्रथमपुरुष एकवचनम्।

त्रसेत् – त्रस् धातु विधिलिङ्ग् परस्मैपदि प्रथमपुरुषैकवचनम्।

मन्येत – मन् धातु विधिलिङ्ग् आत्मनेपदि प्रथमपुरुषशैकवचनम्।

**श्लोकः – 5**

**धन्यानामुत्तमं दाक्ष्यं**

**धनानामुत्तमं श्रुतम् ।**

**लाभानां श्रेष्ठमारोग्यं**

**सुखानां तुष्टिरुत्तमा ॥**

**<u>पदपरिचयः।</u>**

**<u>समानपदम्।</u>**

तुष्टिः - तृप्तिः।

**<u>पर्यायपदानि।</u>**

धन्यः -पुण्यवान्, सुकृती।

दाक्ष्यम् - सामर्थ्यम्, निपुणता।

श्रुतम् - शास्त्रम्, प्रमाणम्।

लाभः -फलम्, वृद्धिः।

आरोग्यम् - अनामयः, रोगाभावः।

**<u>विलोमपदानि।</u>**

दाक्ष्यम् X निर्दाक्ष्यम्।

श्रुतम्   X अश्रुतम्।

लाभः  X  नष्टः।

**<u>गद्यक्रमः।</u>**

अत्र क्रियापदं नास्ति। अतः भवति इति क्रियापदम् अत्र स्वीक्रियते।

किं किं केषां केषाम् उत्तमं भवति? -

**धन्यायाम् उत्तमं दाक्ष्यम् ,धनानाम् उत्तमं श्रुतम्, लाभानाम् आरोग्यं श्रेष्ठं सुखानां तुष्टिः उत्तमा च भवति।**

## <u>श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत</u> ।

1. तुष्टिरुत्तमा अत्र पदच्छेदः कः?

2. धन्यानाम् उत्तमं किम् ?

3. ………… श्रेष्ठम् आरोग्यम् ।

4. श्रुतं केषाम् उत्तमं भवति ?

5. ………… तुष्टिरुत्तमा ।

6. एतत् सुभाषितं कस्मात् ग्रन्थात् स्वीकृतं भवति?

## <u>उत्तराणि</u>

1 तुष्टिः+उत्तमा

2. दाक्ष्यम्

3 लाभानां

4. धनानाम्

5 सुखानाम्

6. महाभारतम्

| | | | |
|---|---|---|---|
| धन्यानाम् | धनानाम् | लाभानाम् | सुखानाम् |
| ↓ | ↓ | ↓ | ↓ |
| उत्तमम् | उत्तमम् | श्रेष्ठम् | उत्तमा |
| ↓ | ↓ | ↓ | ↓ |
| दाक्ष्यम् | श्रुतम् | आरोग्यम् | तुष्टिः |

## गद्यक्रमं लिखत ।

धन्यानां... ... ... ... ... उत्तमम् ।................ श्रुतं उत्तमम् । लाभानां श्रेष्ठम्................। सुखानाम्............ उत्तमा ।

## अधिकविस्तरः

**सन्धिः**

धन्यानाम् + उत्तमम् = धन्यानामुत्तमम्

धनानाम् + उत्तमम् = धनानामुत्तमम्

श्रेष्टम् + आरोग्यम् = श्रेष्टमारोग्यम्

तुष्टिः + उत्तमा = तुष्टिरुत्तमा

विग्रहः

दक्षस्य भावः दाक्ष्यम्।

समर्थस्य भावः सामर्थ्यम्।

कुशलस्य भावः कौशलम्।

**<u>विभक्तिकार्यः</u>**

| षष्ठी | | | |
|---|---|---|---|
| 1.धन्यानाम् | 2.धनानाम् | 3.लाभानाम् | 4.सुखानाम् |

"यतश्चनिर्धारणम्" इतिपाणिनीयसूत्रेण षष्ठीविभक्तिः। समुदायेषु पृथक् करणं निर्धारणं तत्र समुदायात् षष्ठी।

(കൂട്ടത്തിൽ നിന്നും ഒന്നിനെ വേർതിരിക്കുന്നതിന് നിർദ്ധാരണം എന്ന് പറയുന്നു. നിർദ്ധാരണാർത്ഥത്തിൽ ഷഷ്ഠീ വിഭക്തി.)


## Prepared By

**Dr. Sindhu K.Kumar, G.H.S.S.Pazhayannur Thrissur**

**Ambili varma P.K ,SBHS Kurumpilavu ,**

**Thrissur**

**Jyothilekshmi J Govt.skt HS Charamangalam, Alappuzha**

**Arya S, Govt.UPS Anachal, Trivandrum**